Class-VIII (PRATIBHA) Subject- Sanskrit

Time- 2.30 Hrs. M.M.- 50

✓अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति-

खण्ड:(क) - अपठितांश-अवबोधनम् - 10 अंक

खण्ड:(ख)- रचनात्मक-कार्यम् - 08 अंक

खण्ड:(ग)-अनुप्रयुक्त-व्याकरणम् - 12 अंक

खण्ड:(घ) - पठितांश-अवबोधनम् - 20 अंक

✓ प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

✓ सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

✓ प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

खण्ड: - क (अपठितांश-अवबोधनम्)

1. **अनुच्छेदं पठित्वा यथानिर्देशं प्रश्नानाम् उत्तराणिलिखत-**

वर्तमानयुगे विद्या अत्यावश्यकम् अस्ति। विद्याविहीन: मनुष्य:पशुभि: समान:भवति। विद्यया एव मनुष्य: संसारस्य सर्वश्रेष्ठप्राणी कथ्यते। नित्यम् अध्ययनेन मनुष्यस्य बुद्धि: तीव्रा भवति। विद्या विनयं ददाति। विद्या मानवस्य सर्वश्रेष्ठं मित्रम् अस्ति। विदेशेषु अपि विद्या एव मानवस्य बन्धु: अस्ति। मनुष्य:विद्यया पात्रतां याति। पात्रत्वात् धनम् आप्नोति। धनात् सर्वाणि सुखानि लभते। विद्यया एव सर्वे जना: सर्वाणि कार्याणि सम्पादयितुं समर्था: भवन्ति। विद्वांस: विद्यां प्राप्य उन्नतिं यशं समृद्धिं च लभन्ते। विद्याकल्पलता इव कथ्यते। अत: अस्माभि: विद्या पूर्णमनोयोगेन पठनीया।

(अ)एकपदेन उत्तरत -1x2= 2

i.वर्तमानयुगे किम् अत्यावश्यकम् अस्ति?

ii. नित्यम् अध्ययनेन कस्य बुद्धि: तीव्रा भवति?

(ब) पूर्णवाक्येन उत्तरत - -2x2 =4

i.विद्या मानवस्य कीदृशं मित्रम् अस्ति?

ii.विद्वांस: विद्यां प्राप्य किं लभन्ते?

(स) यथानिर्देशं प्रश्नान् उत्तरत् - -1x4=4

i. **'सर्वाणि सुखानि'** इत्यनयो: पदयो: किं विशेषणपदम्।

ii. **'अपयश:'** इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

iii. **'मानव:'** इत्यस्य समानार्थकं पदं गद्यांशात् चित्वा लिखत।

iv. 'संसारस्य' इत्यस्मिन् पदे का विभक्ति:?


---

docs.aglasem.com

aglasem.com

खण्डः - ख (रचनात्मक-कार्यम्)

2.अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि संस्कृतेन लिखत-1x4=4



मंजूषा-

चित्रम्, इदम्,अस्ति, वित्तकोषस्य , अस्मिन् , संगणकम् , कार्गदानि , कर्मचारिणः , ग्राहकाः , धनम् , सुरक्षितम्

अथवा (केवलं नेत्रहीन-छात्राणां कृते)

मंजूषाप्रदत्तानां पदानां सहायतया निम्नलिखितं विषयम् अधिकृत्य चतुर्भिः वाक्यैः अनुच्छेदं लिखत। यदि पदानि अपर्याप्तानि चेत् स्वतंत्ररूपेण नूतनपदानि गृहीत्वा अनुच्छेदं लिखत-

' मम परिवारः'

मंजूषा -

मम , गृहे , सन्ति , जनाः , पञ्च , पिता , माता , भ्राता , भगिनी , प्रकोष्ठाः , सुखी , गृहिणी , शिक्षकः , विद्यार्थी , अहम् , कनिष्ठः , अस्मि , ज्येष्ठा , अनुजः

3. मंजूषायां प्रदत्तपदानां साहाय्येन मित्रं प्रति लिखितं पत्रं पूरयित्वा पुनः लिखत -1x4=4

मंजूषा-

अध्ययनं ,समाचारं ,परिश्रमेण , नमस्ते ,

docs.aglasem.com
aglasem.com

प्रियसुहृद् रमेश !

(1).....।

अत्रकुशलं तत्र अस्तु इति कामये। भवतः प्रेषितं पत्रम् अहम् अद्यैव प्राप्तवान्। सम्पूर्णं (2)..... ज्ञात्वा अतीव प्रसन्नः अभवम्। अग्रिममासे मम वार्षिकपरीक्षा भविष्यति । परीक्षार्थं (3)..... अध्ययनं कुर्वन् अस्मि । आशा अस्ति यत् परीक्षायाम् उत्तमान् अंकान् प्राप्य कक्षायां प्रथमस्थानं प्राप्स्यामि। त्वमपि परिश्रमेण (4).....कुर्वन् असि इति चिन्तयामि। परीक्षायाः अनन्तरं शीघ्रमेव मिलामः। पूजनीयेषु पितृचरणेषु मम प्रणामः कथनीयः।

तव अभिन्नं सुहृद्

अनुपमशर्मा

खण्ड ' ग '

अनुप्रयुक्त-व्याकरणम् (12)

4. मंजूषायां प्रदत्तानां उचितकर्तृ-कर्म-क्रियापदानि मेलयित्वा वाक्यनिर्माणं कुरूत -1x4=4

कर्ता	कर्म	क्रिया
नर्तकः	पुस्तकानि	क्रीडिष्यामः।
अहम्	नृत्यं	पचति।
वयम्	भोजनं	पठामि।
माता	कबड्डीक्रीडाम्	करोति।

5. अधोलिखितेषु वाक्येषु रेखांकितपदानां सन्धिं / विच्छेदं वा कुरूत -1x4=4

(क)आगामिमासे **परि+ईक्षा** भविष्यति।

(ख)प्रातः **सूर्योदयः** भवति।

(ग)माता **देव+आलयं** गच्छति।

(घ)छात्रः **पुस्तकालये** पठति।

6. रेखांकितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत । -1x2=2

(क)रमा **गम्+क्त्वा** आगच्छति।

(ख)रमेशः सुखं **अनु+भू+ल्यप्** हसति।

7.अधोलिखितपदेषु कःउपसर्गःप्रयुक्तः? -1x2=2

(क) अनुभवः -

(ख) उपकारः-

docs.aglasem.com

aglasem.com

खण्ड -' घ '(पठितांश-अवबोधनम्)

8. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा। तेन उदाहृतं यद् गतिशीलायां नौकायाम् उपविष्टः मानवः नौकां स्थिरामनुभवति, अन्यान् च पदार्थान् गतिशीलान् अवगच्छति। एवमेव गतिशीलायां पृथिव्याम् अवस्थितः मानवः पृथिवीं स्थिरामनुभवति सूर्यादिग्रहान् च गतिशीलान् वेत्ति। 476 तमे ख़िस्ताब्दे (षट्सप्तत्यधिकचतुःशततमे वर्षे) आर्यभटः जन्म लब्धवानिति तेनैव विरचिते 'आर्यभटीयम्' इत्यस्मिन् ग्रन्थे उल्लिखितम्। ग्रन्थोऽयं तेन त्रयोविंशतितमे वयसि विरचितः। ऐतिहासिकस्रोतोभिः ज्ञायते यत् पाटलिपुत्रं निकषा आर्यभटस्य वेधशाला आसीत्। अनेन इदम् अनुमीयते यत् तस्य कर्मभूमिः पाटलिपुत्रमेव आसीत्।

I. एकवाक्येन उत्तरत - 1x2=2

(क) सूर्यः कुत्र अस्तं गच्छति?

(ख) पूर्वदिशायाम् किम् उदेति?

II. पूर्णवाक्येन उत्तरत - 1x2=2

(क) आर्यभटस्य वेधशाला कुत्र आसीत् ?

III. निर्देशानुसारं प्रश्नान् उत्तरत - 1x2=2

(क) **'पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा'**अस्मिन् वाक्ये अव्ययपदम् किम् ?

(ख)'पाटलिपुत्रम्' इत्यस्मिन् पदे का विभक्तिः?

(i) चतुर्थी (ii) द्वितीया (iii) अष्टमी (iv) षष्ठी

9. अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत -

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ॥ 1॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिवेत्।
सत्यपूतं वदेद्वाचं मनःपूतं समाचरेत्॥

docs.aglasem.com
aglasem.com

I. एकपदेन उत्तरत -1x2=2

(क) कथं पादं न्यसेत् ?

(ख) कथं समाचरेत् ?

II. पूर्णवाक्येन उत्तरत -1x2=2

(क) वृद्धोपसेविन:अभिवादनशीलस्य नित्यं किं वर्धन्ते ?

III. यथानिर्देशम् उत्तरत -2x1=2

(क)**'वारि'** इत्यस्य किं समानार्थकपदम् अस्मिन् श्लोके प्रयुक्तम् ?

(ख)'तस्य' इत्यत्र का विभक्ति: प्रयुक्ता ?

10. **अधोलिखितं श्लोकांशं योजयत** - 1x4=4

(क)	(ख)
कस्तूरी जायते कस्मात् ?	सिंह:
यं मातापितरौ क्लेशं	मृगात्
को हन्ति करिणां कुलम् ?	कर्तुं वर्षशतैरपि
न तस्य निष्कृति: शक्या	सहेते सम्भवे नृणाम्

11. **प्रदत्तानां तद्भवपदानां कृते मञ्जूषात: संस्कृतपदानि चित्वा लिखत** - 1x4=4

ज्योतिर्विद् , नौका , पुस्तकम् , धरा

(क) धरती-.....

(ख) ज्योतिषी-.....

(ग) नाव-.....

(घ) पुस्तक-.....

docs.aglasem.com

aglasem.com